संस्कृतवार्ता:

01.08.2024

सायम् - 06:20

<u>मुख्यवार्ता:</u>

· भारतवियतनामदेशौ व्यापकं रणनीतिकसहभागित्वम् इतोऽपि सुदृढीकर्तुं द्विपक्षीय वार्तां विहितवन्तौ।

· केरलस्य वायनाडजनपदे दुरापन्ने भूस्खलनप्रकरणे अन्वेषणाभियानं साम्प्रतमपि प्रचलति। मृतकानां संख्या षष्ट्यधिकद्विशतं जाता।

· सर्वोच्चन्यायालयेन अनुसूचितजाति-अनुसूचितजनजातिवर्गयोः अन्तर्गतम् उपश्रेण्याः अनुमतिसम्बद्धे प्रकरणे निर्णयः श्रावितः।

· भारतेनश्रीलंकादेशस्य कच्चातीवू-द्वीपस्य उत्तरे भारतीय-मत्स्य-मारकाणां नौकया साकं संघट्टनानन्तरम् अद्य श्रीलंकायाः राजदूतः समाकारितः।

· पेरिसक्रीडा-महाकुम्भे लक्ष्य-वेधकः स्वप्निलः कुसालेः भारताय तृतीयं कांस्य पदकं विजितवान्।

<u>प्रधानमन्त्री-वियतनामः</u>

प्रधानमन्त्रिणा नरेन्द्रमोदिना अद्य नवदेहली-नगरे वियतनामदेशीयेन स्वीय समकक्षीयेन फ़ाम् मिन्ह् चिन्ह् इत्यनेन सह वार्तालापः साधितः । स्ववार्ताहरसम्भाषणे प्रधानमन्त्रिणा नरेन्द्रमोदिना अभिव्यक्तम् यत्, भारत-वियत्नाम-देशयोः सम्बन्धः विस्तृतः सुदृढः च जातः तथा च गतदशवर्षाणां सम्बन्धेभ्यः समग्र-सामरिक-सहभागित्वस्य आकारः दत्तः अस्ति। वार्तायाः अनन्तरं उभौ नेतारौ वियट्नाम्-देशस्य न्हा ट्राङ्ग्-नगरे दूरसञ्चारविश्वविद्यालये सेना-तन्त्रांश-उद्यानम् उद्घाटितवन्तौ । इयं भारत-वियट्नाम्-देशयोः पारस्परिकपरियोजनास्ति। परियोजनायाः कृते भारतेन पञ्चलक्ष-डालरमितस्य राशिसाहाय्यं प्रदत्तम् । उभौ देशौ सीमाशुल्क-क्षमता-निर्माण-कृषिअनुसंधान- शिक्षा-सागरीयपरम्परा-औषधीय-वनस्पतिविधिक्षेत्रेषु सहयोगाय सहभागिताज्ञापनपत्रे हस्ताक्षरं कृत्वा आदानप्रदानम्

अकुरुताम् । प्रसारभारती, वाय्स् आफ् वियट्नाम् इति च श्रव्यांकन-दृश्यांकनयोः सहकारार्थं सहभागिताज्ञापनपत्रस्य आदानप्रदानमपि जातं । प्रधान मंत्री श्रीचिन्ह: अद्य राष्ट्रपतिना द्रौपदीमुर्मू इत्यनया उपराष्ट्रपतिना जगदीप धनखडेन च सह मेलनं करिष्यति |

## केरल-भूस्खलनम्

केरलस्य वायनाड-जनपदे दुरापन्ने भूस्खलन प्रकरणे शवानां विलुप्त जनानां च अन्वेषण अभियानं साम्प्रतमपि प्रचलति धेयमस्ति यत तत्र नैके जनाः पञ्चतां प्राप्ताः आसन् येषु साम्प्रतं यावत् षष्टि-उत्तर द्विशतमिताः जनाःमृताः सूच्यन्ते। सुरक्षोद्धारकर्मिभिः भूम्यन्तर-वर्तिनः नैके शवाः भू-स्खलन-स्थलात् अधिगताः सन्ति। अधिगतेषु शवेषु नवनवतिमिताः शवाः अधुनापि अनभिज्ञाताः एव सन्ति। मृतकानां संख्या अतोऽपि वर्धिष्यते इति सम्भाव्यते। आधिकारिक-स्रोतांसि सूचयन्ति यत् अस्यां दुर्घटनायां व्रणिताः नैके जनाः विभिन्नेषु चिकित्सालयेषु उपचाराधीनाः सन्ति । ध्वंसावशेषेषु निरूद्धानां जनानाम् उद्धाराय अधुना अपि आपद्-मोचनबलानि, राज्य-सर्वकारस्य विभागाः , जनता च पूर्णतो दृशा प्रयासपराः सन्ति ।

## सर्वोच्चन्यायालयः-अनुसूचितजातिवर्गः

भारतस्य मुख्यन्यायाधीशस्य डी.वाई. चन्द्रचूडस्य नेतृत्वे सर्वोच्चन्यायालये सप्त-न्यायाधीशनाम् एकेन पीठेन अद्य बहुमतेन राज्यविधानमण्डलद्वारा अनुसूचितजाति-अनुसूचितजनजातिवर्गयोः अन्तर्गतम् उपश्रेण्याः अनुमतिसम्बद्धे निर्णयः श्रावितः। सर्वोच्चन्यायालयेन चतुरधिकद्विसहस्रतमवर्षस्य ई.वी. चिन्नैयाइत्येतस्य निजनिर्णये प्रतिपादितमासीत् यत् अनुसूचितजनजातिवर्गस्य आरक्षणस्य उपश्रेण्याः विभाजनं रिक्तेषु सर्वकारीयवृत्तिषु च स्वीकार्यं नास्ति।

## लोकसभा-रेलविभागः

प्रशासनेन अद्य सबलं प्रख्यापितं यत् प्रशासनं देशे रेलदुर्घटनाः रोद्धुं प्रतिबद्धं वर्तते अपि च यूपीएइत्यस्य प्रशासनस्य अपेक्षायां दुर्घटनानां संख्यायां अष्टषष्टिः प्रतिशतं यावत् न्यूनतापि आगता। लोकसभायां स्वीयमन्त्रालयस्य अनुदानाभ्यर्थने चर्चायाः एकस्याः उत्तरं यच्छन् केन्द्रीयरेलमन्त्री अश्विनीवैष्णवः अवदत् यत् यूपीए-प्रशासनावधौ प्रतिवर्षं दुर्घटनानां वार्षिकी सङ्ख्या एकसप्तत्यधिकैकशतम् आसीत्।

## लोकसभा-सौभाग्यम्

प्रधानमन्त्री-सहज-बिजली-हर-घर-योजनायाः सौभाग्यइत्यस्याः अन्तर्गतं देशस्य आहत्य षडशीतिलक्षाधिक-द्विकोटिः गृहेभ्यः विद्युत्सौविध्यं प्रदत्तम्। अद्य लोकसभायाम् एकस्मिन् लिखितोत्तरे विद्युत्-राज्यमन्त्री श्रीपदनाइकः सूचितवान् यत् प्रशासनेन देशे सार्वभौमिक-स्वदैशिक-विद्युतीकरण-लक्ष्यम् अधिगन्तुं सप्तदशाधिक-द्विसहस्रतमे वर्षे योजनेयं समारब्धा। सौभाग्यायोजनायाः माध्यमेन कोटिशः गृहाणि विद्युत्सम्पर्कं प्राप्तानि सन्ति।

## राज्यसभा-रिक्तनिर्णयः

विधिन्यायमन्त्री अर्जुनराममेघवालः अद्य राज्यसभायां सूचितं यत् देशस्य उच्चन्यायालयेषु न्यायाधीशानां नवपञ्चाशदधिकत्रिशतं रिक्तपदानि सन्ति। राज्यसभायां लिखितोत्तरे मन्त्री अकथयत् यत् प्रवर्तमानरिक्तिनां प्रपूरणाय शीघ्रतया सर्वविधप्रयासाः क्रियन्ते। जनपदन्यायालयेषु च रिक्तपदानां पूरणप्रक्रिया उच्चन्यायालयानां राज्यप्रशासनस्य च कर्तव्यमस्ति इति।

## भारत-श्रीलंकाः

भारतेन श्रीलङ्कादेशस्य नौसैन्यबलस्य जलपोतस्य कच्चातीवू-द्वीपस्य उत्तरे भारतीय-मत्स्य-मारकाणां नौकया साकं संघट्टनानन्तरम् एकस्य भारतीय-मत्स्यमारकस्य सञ्जातमृत्युप्रकरणे अद्य श्रीलङ्कायाः राजदूतः समाकारितः। विदेशमन्त्रालयेन प्रतिपादितं यत् नवदिल्ल्यां श्रीलङ्कादेशस्य कार्यवाहकम् उच्चायुक्तम् आहूय प्रातरेव विदेशमन्त्रालयेन विरोधः पञ्जीकृतः। मन्त्रालयेन प्रोक्तं यत् कोलम्बोनगर्यां भारतीयः उच्चायुक्तः अद्य अस्मिन् प्रकरणे श्रीलङ्कासर्वकारस्य पुरतः नैजं विरोधवक्तव्यम् उपस्थापयिष्यति। मन्त्रालयेन एतदपि प्रोक्तं यत् भारतसर्वकारेण सर्वदैव मत्स्यमारणरतानां धीवराणां प्रकरणेषु मानवीय-पद्धत्या निदानस्य आवश्यकतायां बलं प्रदीयते। अद्य अस्मिन् विषये पक्षद्वयेनापि सशक्ततया अस्यानुपालनम् आचरणीयम्। येन पुनः एतादृशी घटचा नैव दुर्घटेत्।

## भारतर्तुविज्ञानं-पूर्वानुमानः

भारतर्तुविज्ञान विभागेन कल्पितं यत् सम्पूर्णे राष्ट्रे दक्षिणपश्चिमीयप्रावृट्ऋतोः द्वितीयभागावधौ वृष्टिः भविष्यति। ऋतुविभागेन उत्तरपूर्वीयभारते लद्दाखे सौराष्टे कच्छक्षेत्रे च सामान्यवृष्टितः अतिवृष्टिः अनुमानिता। अत्रावधौ ह्यः रात्रौ राष्ट्रियराजधान्यां दिल्ल्यां महतीवृष्टिः जाता। अस्य मासस्य पञ्चमदिनाङ्कं यावत् दिल्ल्यां मध्यमस्तरीया वृष्टिः अपि सम्भाविता।

पेरिस-क्रीडा-महाकुम्भः

पेरिसक्रीडा-महाकुम्भे लक्ष्य-वेधकः स्वप्निलः कुसालेः पुरूषाणां पञ्चाशत्-मीटर-रायफल-थ्री-पोजिशन-शूटिंग इति स्पर्धायां भारताय तृतीयं कांस्य पदकं विजितवान्। पुरुषाणां पञ्चाशत्-मीटर-रायफल-थ्री-पोजिशन-शूटिंग-योग्यतार्जन-स्पर्धायां कुसालेः सप्तमे स्थाने स्थित्वा अन्त्य-द्वन्द्वे स्थानम् अधिगतवान्। महिलानां पञ्चाशत्-मीटर-रायफल-थ्री-पोजिशन इति द्वन्द्वे सिफ्त कौरः समरा अञ्जुम मौद्गिलश्च समर्हता-चक्रे भारतीय-समयानुसारेण अद्यापराह्णे सार्ध-त्रि-वादनानन्तरं निज-क्रीडाभियाने निरते वर्तेते।

अत्रावसरे प्रधानमन्त्री श्रीनरेन्द्र-मोदी कांस्य-पदकस्य विजयम् अभिलक्ष्य स्वप्निलः कुसालेः इत्यस्मै मंगलवचोभिः वर्धापनानि प्रदत्तवान्। एकस्मिन् सामाजिक-सञ्जाले प्रेषिते सन्देशे श्रीमोदी अलिखत् यत् तस्य क्रीडाप्रदर्शनं उत्कृष्टं विशिष्टं च वर्तते। यतोहि तेन अद्भुतं क्रीडाकौशलं प्रदर्शितम्। श्रीमोदी प्रोक्तवान् यत् सः अस्यां श्रेण्यां पदकस्य विजेता प्रथमः भारतीयः क्रीडकः संवृत्तः अस्ति। अनेन पदकार्जनेन समस्ते भारते प्रसन्नतायाः लहरी वर्तते।

।। इति वार्ताः।।